International Journal of Sanskrit Research 2021; 7(5): 335-337

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(5): 335-337
© 2021 IJSR
www.anantaajournal.com
Received: 21-07-2021
Accepted: 25-08-2021

**गौराङ्गः चौधुरी**
शोधछात्रः, पि.एइच्.डि संस्कृत-पालि-प्राकृतविभागः विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

**Corresponding Author:**
**गौराङ्गः चौधुरी**
शोधछात्रः, पि.एइच्.डि संस्कृत-पालि-प्राकृतविभागः विश्वभारती, शान्तिनिकेतनम्, पश्चिम बंगाल, भारत

# नदी-विश्वामित्रसूक्ते वर्णिते विपाट्छतुद्र्यौ नद्यौ स्त्रियौ वा

**गौराङ्गः चौधुरी**

**शोधपत्रसारः**
मुख्यतया वैदिकसाहिस्यस्यास्य मन्त्रभेदेन ब्राह्मणभेदेन च भागद्वयं वर्तते। अस्मिन् दशममण्डलसमन्विते ऋग्वेदे बहुविषया वर्णिताः। तत्र न केवलमेव अग्नीन्द्रादयो देवस्तुतिमूलका विषया वर्णिता, एतद्विहाय दार्शनिकभावधारायुक्तानि, दानस्तुतिविषयकानि सूक्तानि, राष्ट्रैकविषयकानि सूक्तानि, अक्षसूक्तादीनि धर्मनिरपेक्षसूक्तानि, संवादसूक्तानि च वर्णतानि। एतेषु यथा दार्शनिकसूक्तानि उपनिषदां रहस्यतत्त्वेन सम्बध्यते, तथैव कानिचित् सूक्तानि काव्यरसैः सह सम्बध्यते। कथोपकथनस्य प्राधान्यबशात् एतानि संवादसूक्तानीति कथ्यते। यद्यपि कथोपकथनविषयकानि बहुनि सूक्तानि विद्यन्ते, तथापि विंशतिसूक्तेष्वेव काव्यतत्त्वस्य नाट्यरसस्य च सञ्चारः परिदृश्यते। एतेषु सूक्तेषु ऋग्वेदस्य तृतीयमण्डलस्य त्रयोस्त्रिंत्तमे नदी-विश्वामित्रसूक्ते प्रयुक्ते विपाट्-शतुद्री इति पदद्वयस्य वैचित्र्यं परिलक्ष्यते। सूक्तस्य सामान्याध्ययनेन नाम्ना च उभययोः नदीरूपं प्रकाशितम्। अतः प्रश्नो जायते नाम्ना एव यदि अर्थः परिस्फुटितो भवति तर्हि विदुषी-स्त्री इति अर्थग्रहणस्य आवश्यकता का?अयमेव विषयः भाष्यकारदृष्ट्या अत्र आलोचयिष्यते। अपि च ग्रहणीयताविषये संशये जाते निरुक्तादीनां परिपूरकप्रामाणिकग्रन्थानां मतानि अपि आलोचयिष्यन्ते।

**कूट शब्दः** नदी-विश्वामित्रसूक्ते, वैदिकसाहिस्यस्यास्य, दशममण्डलसमन्विते ऋग्वेदे

## प्रस्तावना

वेदाः सन्ति सर्वेषां ज्ञानामाभारग्रन्थाः। एतस्मात् कारणात् संस्कृतवांमये वेदानां महत्त्वं सर्वोपरि वर्तते, इत्यस्मिन् विषये नास्ति कश्चित् संशयः। वेद इत्यभिधानेन यदेकं सुविस्तृतं वांमयम् अवगम्यते तदेव वैदिकवांमयम् इत्यभिधीयते। अयं वेद-शब्दस्तु ज्ञानार्थकात् विद् धातोरूत्पद्यते । ज्ञानमिदं न केवलमेव साधारणज्ञानम् अपि तु अतीन्द्रियज्ञानं वेति। प्रमुखैराचार्यैर्वेदस्यास्य बहुविधानि लक्षणानि निश्चीयन्ते। प्रसङ्गेऽस्मिन् सायणाचार्येण कृष्णयजुर्वेदस्य तैत्तिरीयभाष्यभूमिकायां परिभाषितं यत्-

`इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो ग्रन्थो वेदयति स वेदः' [1]।

याज्ञवल्केनापि वेदलक्षणे उल्लिखितं यत्-

`प्रत्यक्षेणनुमित्या वा यस्तुपायो न विद्यते।
एनं विदन्ति वेदेन तस्मात् वेदस्य वेदता।' [2]

अर्थात् प्रत्यक्षानुमानप्रमाणाभ्यं य उपायः अधिगन्तुं न शक्यते, स उपायो वेदेनैव ज्ञायते।
मुख्यतया वैदिकसाहिस्यस्यास्य मन्त्रभेदेन ब्राह्मणभेदेन च भागद्वयं वर्तते। परन्तु सौविद्ध्यर्थं वैदिकवांमयस्यास्य विभाजनचतुष्टयं समायातम्- संहिता, ब्राह्मणम्, आरण्यकम्, उपनिषद् चेति। वेदचतुष्टयेषु ऋग्वेदः सर्वादौ वर्तते। अस्मिन् दशममण्डलसमन्विते ऋग्वेदे बहुविषया वर्णिताः। तत्र न केवलमेव अग्नीन्द्रादयो देवस्तुतिमूलका विषया वर्णिता, एतद्विहाय दार्शनिकभावधारायुक्तानि, दानस्तुतिविषयकानि सूक्तानि, राष्ट्रैकविषयकानि सूक्तानि, अक्षसूक्तादीनि धर्मनिरपेक्षसूक्तानि, संवादसूक्तानि च वर्णतानि। एतेषु यथा दार्शनिकसूक्तानि उपनिषदां रहस्यतत्त्वेन सम्बध्यते, तथैव कानिचित् सूक्तानि काव्यरसैः सह सम्बध्यते । कथोपकथनस्य प्राधान्यबशात् एतानि संवादसूक्तानीति कथ्यते। एतानि संवादसूक्तान्याख्यानम्, इतिहासः नाम्ना परिचितानि। एतानि भवन्ति नाट्यतत्वस्य प्रारम्भिकनिदर्शनानि। वस्तुतः ऋग्वेदस्य एनं विषयमाधारीकृत्यैव लौकिकसाहित्येषु नाट्यसूचना क्रियते। अधुना प्रश्नो जायते स्तुत्यात्मके ऋग्वेदे केन प्रकारेण नाट्यरसस्य सञ्चारो भवति? यतो हि यज्ञकर्मणि विनियोगे पद्यात्मकैर्मन्त्रैः ऋषिभिर्देवाः प्रार्थयन्ते स्तुयन्ते वा। अतः वक्तुं शक्यते एतैः रसवैचित्र्यपूर्णैः सूक्तैर्देवानां प्रशंसा एव क्रियते। यद्यपि कथोपकथनविषयकानि बहुनि सूक्तानि विद्यन्ते, तथापि विंशतिसूक्तेष्वेव काव्यतत्त्वस्य नाट्यरसस्य च सञ्चारः परिदृश्यते।

एतेषु सूक्तेषु ऋग्वेदस्य तृतीयमण्डलस्य त्रयोस्त्रिंत्तमे नदी-विश्वामित्रसूक्ते प्रयुक्ते विपाट्-शतुद्री इति पदद्वयस्य वैचित्र्यं परिलक्ष्यते। सूक्तस्य सामान्याध्ययनेन नाम्ना च उभययोः नदीरूपं प्रकाशितम्। अतः प्रश्नो जायते नाम्ना एव यदि अर्थः परिस्फुटितो भवति तर्हि विदुषी-स्त्री इति अर्थग्रहणस्य आवश्यकता का? तदुत्तरे वक्तुं शक्यते वेदार्थबोधने या भाष्यपरम्परा विद्यन्ते तेषु अन्यतमयोः सायम-दयानन्दयोर्मध्ये पदार्थदृष्ट्या च वैभिन्यं परिदृश्यते, येन आधुनिके समये अर्थग्रहणीयताविषये संशय उत्पद्यते।

पुरा बृहद्देवतायां कथितमस्ति यज्ञ-पुरोहितः विश्वामित्रः राज्ञा सुदासेन सह गमनसमये विपाट्-शतुद्रीनद्योः सङ्गमस्थले समागतः सन् नद्योः गतिवेगं दृष्ट्वा स्तब्धः अभवत्। तदानीं ऋषिः शम् इत्यनेन शब्देन नद्यौ सम्बोधनं कृत्वा प्रशंशितवान् [3] । अर्थात् अत्र विपाट्-शतुद्री नदीरूपेणैव परिचीयते।

यास्काचार्येणापि शतुद्री इत्यस्य पदस्य निर्वचनं नदीरूपेण एव क्रियते- `शतुद्री शु द्राविणी, क्षिप्र-द्राविणी, आशु तुन्नेव द्रवतीति वा' [4]। यत् सायणाचार्येण मुख्याधाररूपेण गृह्यते।

अतः प्रश्नो जायते यदि सर्वत्रैव नद्यौ इति अर्थः क्रियते तर्हि दयानन्दकृतौ विदुषी-स्त्रियौ इत्यस्यार्थग्रहणस्य प्रासङ्गिकता कुत्र वर्तते, तदुत्तरे वक्तुं शक्यते वेदे अयमर्थोऽपि प्रयुज्यते, यतः निघण्टौ `विपः' शब्दस्यार्थो मेधावी इति क्रियते [5]।

अतः भाष्यकारभेदेन विपाट्छतुद्र्योः वर्णनवैचित्र्यप्रदर्शनाय ऋग्वेदस्य तृतीयमण्डलस्य त्रयस्त्रिंशत्तमसूक्तस्य प्राथमिकमन्त्रस्य व्याख्यानमाध्यमेन सायणदयानन्दयोः पदार्थदृष्ट्या भावार्थदृष्ट्या च वैभिन्यं परिदृश्यते।

**सम्पूर्णमन्त्रः**

“प्र पर्वतानामुशती उपस्थादश्वेइव विषिते हासमाने ।
गावेव शुभ्रे मातरा रिहाणे विपाट्छतुद्री पयसा जवेते”।(ऋ.वे. ३.३३.१)

| मन्त्रपदानि | सायणभाष्यम् | दयानन्दभाष्यम् |
|---|---|---|
| प्र | | |
| पर्वतानाम् | शैलानाम् | मेघानाम् |
| उशति | समुद्रगमनं कामयमाने | कामयमाने |
| उपस्थात् | उत्सङ्गान्निर्गत्य | समीपात् |
| अश्वेइव | वडवे | अश्ववडवाविव |
| विषिते | मन्दुराते विमुक्ते | विद्याशुभगुणकर्मव्याप्तेः |
| हासमाने | अन्योन्यंजवेनस्पर्धमाने यद्वा हष्यन्त्यौ | |
| गावेव शुभ्रे | द्वो गावौ शोभमाने वर्तते तद्वच्छुभ्रेशोभमाने | यथा धेनुवृषभौ श्वेते शुभगुणयुक्ते |
| मातरा | यथा मातरौ धेनुः | मान्यपदे |
| रिहाणे | अन्तर्णीतसनर्थोलिहिः वत्सं जिह्वया लेढुमिच्छन्त्यौ शीघ्रं गच्छतः तद्वत्समुद्रंगन्तुंजवाद्गच्छन्त्यौ | आस्वदित्र्यौ |
| विपाट् | कुलविपटनात् विपाशनात् शतपुत्रमरणोद्भूत तमोवृत्तेः मुमुर्षो वसिष्टस्य पाशा अस्यां व्यपास्यन्त विमोचनाद्वा विपाट् | या विविधं पटति गच्छति विपाटयति वा सा। |
| शतुद्री | शुक्षिप्रंतुन्नातुन्नैव द्रवतिगच्छतीतिशुतुद्री | शु शीघ्रं तुदति व्यथयति सा |
| पयसा | | जलेन |
| जवेते | समुद्रं प्रति शीध्रं गच्छतः | गच्छतः |

सर्वादौ मन्त्रस्य देवता-छन्द-निर्णये सायण-दयानन्दयोर्मध्ये मतभेदो दृश्यते। सायणाचार्यस्य मतानुसारं ऋषिणा विश्वामित्रेण त्रिष्टुभ्-छन्दसा लैङ्गिकसूक्तविनियोगे इन्द्रः एव देवतारूपेण स्तुतः। परन्तु महर्षेः दयानन्दस्य मतानुसारम् ऋषिणा विश्वामित्रेण भुरिक्-पङ्क्ति-छन्दसा नदी एव देवतारूपेण स्तुता। अनेन एव बुध्यते एकस्यैव मन्त्रस्य व्याख्याकाले सायणादिशा इन्द्रस्य प्रशंसा भवति, अपि च दयानन्ददिशा विपाट्छतुद्र्योः प्रशंशा एव क्रियते।

सायणाचार्यस्य मतानुसारं विपाट् इति `कुलविपाटनात् विपाशनात् शतपुत्रमरणोद्भूततमोवृत्तेः मुमुर्षोः वसिष्टस्य पाशाम् अस्यां व्यपास्यन्त विमोचनाद्वा'। पुराणेषु कथितमस्ति वसिष्टः शतपुत्रवियोगस्य विरहवशात् आत्मानं बध्वा एकस्यां नद्याम् उत्क्षेपितवान्। तस्मात् तया एव नद्या स वशिष्टः पाशबन्धनात् विमुच्यते। एतः पाशाविमुक्तकृतत्वात् सा विपाशा। अपि च सायणाचार्यस्य मतानुसारं सा पाशबन्धनविमोचनकारी नदीरूपेण परिचीयते। अयमर्थः बहुषु कोशग्रन्थेष्वेव स्वीक्रियते। परन्तु दयानन्देन `या विविधं पटति गच्छति विपाटयति वा'। अर्थस्यास्य पुष्टिबर्धनाय वक्तुं शक्यते वेदे अयमर्थः अपि प्रयुज्यते, यतः निघण्टौ विपः शब्दस्यार्थः मेधावी क्रियते [6]। अत्र स्त्री-लिङ्गस्य प्रयोगबशात् मेधावी पटन्ती स्त्री इति कथ्यते, या विविधेन मार्गेण गच्छति।

पनुः शतुद्री इत्यस्य पदस्यार्थबोधने सायणाचार्येण कथ्यते यत्- `शुक्षिप्रंन्नातुन्नैव द्रवतिगच्छतीतिशुतुद्री'। अनेन कथनेन द्रुतगतियुक्तं नदीरुपत्वमेव प्रतिष्ठितम्। अयमर्थः अमरकोशादिषु कोषग्रन्थेषु स्वीकृतः। दयानन्देनापि पदार्थग्रहणसमये अयमर्थ उद्धाषितः। तेनोच्यते- `शु शीघ्रं तुदति व्यथयति सा'। यद्यपि इयमुक्तिः साधारणतया नदीरूपमर्थमेव परिपुष्णाति तथापि दयानन्देन एकस्या रमण्या गुणरुपेण उपस्थापिता ।

तस्मात् उशती शब्दस्यार्थनिर्णयप्रसङ्गे सायणदयानन्दाभ्यां `कामयमाने' इति पदं प्रयुक्तम्। पदमिदं वश् धातोः शतृप्रत्यययोगेन उत्पद्यते, यस्यार्थो भवति कामना। अतः साधारणदृष्ट्या अर्थनिर्णये यद्यपि भेदो न विद्यते, तथापि सायणाचार्येण समुद्रगमनं इति पदं प्रयुज्य विशेषतया नदीरूपार्थ एव प्रकाश्यते।

तदनु पर्वतानाम् इत्यस्य पदस्यार्थबोधने सायणाचार्येण `शैलानाम्' इति अर्थः कृतः। यस्मिन् विषये विशेषः संशयः न उत्पद्यते, यतः अमरकोशादिकोशग्रन्थेषु निरुक्ते च अयमर्थः स्वीकृतः। परन्तु दयानन्देन `मेघानाम्' इति अर्थः कृतः। अस्य अर्थस्य ग्रहणीयताविषये संशयः उत्पद्यते, यतः लौकिके अयमर्थः कुत्रापि न प्रयुज्यते। पर्वते आशेते इति पर्वताशयः इत्यनेन निर्वचनेन एव मेघः इति अर्थं चकार। अर्थोऽयं युक्तियुक्तः, यतः निघण्टौ त्रिंशन्मेघनामसु पर्वत इति नाम विद्यते [7]। निरूक्तकारेण यास्काचार्येणापि पर्वत-शब्दस्यार्थबोधने मेघः इति अर्थः स्वीकृतः [8]।

तदनन्तरं उपस्थात् इत्यस्य पदस्यार्थबोधने सायणदयानन्दयोर्मध्ये तावत् वैभिन्यं न परिलक्षते। तयोः केवलं शब्दपार्थक्यं विद्यते। यथा सायणाचार्येण `उत्सङ्गात्' अपि च दयानन्देन `समीपात्' इति अर्थः कृतः।

पुनः पयसा अर्थात् `जलेन सह' अयमर्थो भाष्यकाराभ्यामेव स्वीकृता।

तदनु जवेते इत्यस्य पदस्यार्थनिर्णये भाष्यकाराभ्यां `गच्छतः' इति अर्थः कृता। परन्तु सायणाचार्येण अन्वयपक्षे प्र-उपसर्गेण सह संयोगात् शीघ्रमिति अर्थः परिस्फुटितो भवति। पुनः तेनैव समुद्रं प्रति इति पदं संयुज्य तयोः विपाट्छतुद्र्योः नदीरूपत्वम् अभिभाष्यते।

पुनः तयोः गमनरीतिः `अश्वे इव निषिते हासमाने', `गावेव शुभ्रे मातरा रिहाणे' इति द्विविधया उपमया उपस्थापिता। उपमाद्वयमेव उभयाभ्यां भाष्यकाराभ्यामेव स्वीकृतम्। अर्थात् सायणाचार्यस्य मतेन विपाट्-शतुद्री इति नद्यौ मन्दुरात् विमुक्तः अश्व इव अपि

च बन्धनात् मुक्तौ यथा मातरं निकषा गच्छतः तद्वत् समुद्रं प्रति गच्छतः । परन्तु दयानन्दस्य मतानुसारं विपाट्-शतुद्री इति विद्यारूपे रमण्यौ विद्याकामीजनानां समीपे मन्दुरात् विमुक्तः अश्व इव, बन्धनात् मुक्तौ गावौ इव च गच्छतः।

अत्र सायणाचार्येण नद्योः गमनमार्गं बोधयितुं विषिते इत्यस्य पदस्यान्वयं कृतम्, यस्यार्थः क्रियते `मन्दुरात् विमुक्ते' अर्थात् बन्धनात् मुक्तौ गावौ इव। कोशग्रन्थेषु निरुक्ते च सर्वत्रैव विषित इति व्याप्तम् इति अर्थः प्रयुक्तो भवति, यत् दयानन्देन स्वभाष्ये निगद्यते। तेनोच्यते विद्याशुभगुणकर्मव्याप्ते, अर्थात् विपाट्छतुद्र्यौ इति द्वौ स्त्रियौ विद्याशुभगुणकर्मव्याप्ते भवतः। निरुक्तकारेणापि विष्णु-शब्दस्य व्युत्पत्तिगतार्थनिर्णयप्रसङ्गे विष् धातोः अर्थः व्याप्तमिति कृतम् [9]। शङ्कराचार्येणापि उच्यते व्याप्तार्थे विष्-धातोः परं णुक् प्रत्यययोगेन विष्णु इति पदं निष्पद्यते [10]। अतः प्रश्नो जायते सायणाचार्येण नद्योः गतिपथविश्लेषणार्थं यत् विशेषणं तत् किं अर्थविहीनम्, तदुत्तरे उच्यते सायणाचार्येण निरुक्तकारः अनुसृतः। यास्काचार्येण निरुक्ते सम्पुर्णमन्त्रस्य अर्थः कृतः, यत्र `विषिते' इत्यस्य पदस्यार्थः विमुक्ते, एकत्रे वा इति क्रियते [11]।

ऋग्वेदीयमन्त्रस्यास्य सायण-दयानन्दभाष्ययोः पदभेदेन तुलनात्मकाध्ययनात् परं परिदृश्यते यत् सायणाचार्यदृष्ट्या विपाट्छतुद्र्यौ नदीरूपेण परिगण्यते अपि तु दयानन्ददृष्टात्र्यौ स्त्रियौ च। तर्हि विपाट्छतुद्र्योः प्रकृतस्वरूपं किं नद्यौ स्त्रियौ वा? अध्ययनात् एतदु वक्तुं शक्यते यत् मन्त्रेषु यानि पदानि प्रयुक्तानि तानि अधिकतया नदीमेव सूचयन्ति, न तु स्त्रियौ। यास्काचार्योपि मन्त्रस्यास्य व्याख्यानसमये नदीरूपमर्थमेव सूचयति [12]। आधुनिकभूवैज्ञानिकैः अपि प्रमाणीक्रियते यत् वैदिकसभ्यतायां तथा आर्यसभ्यतायां स्थिते विपाट्-शतुद्र्यौ इति नद्यौ आधुनिकसमये व्यास-सतलज-नाम्ना परिचीयते। अतः नदीरूपेणैव विपाट्छतुद्र्यौ एव ग्रहणीये। परन्तु दयानन्दस्य मतमपि न अस्वीकरणीयम्, यतः वैदिककोशग्रन्थस्वरूपे निघण्टौ निरुक्ते च उभयत्र मेधावी-स्त्रीरूपा अर्थमपि प्रदीयते। येन दयानन्दस्य व्याख्याने वैभिन्यं सूच्यते। न केवलमेव अस्मिन् मन्त्रे विविधेषू मन्त्रेष्वेव इयं वैचित्र्यता परिलक्ष्यते, येन संवादसूक्तानां विषयवस्तुः परिपर्तितो जातः। अतः अनेनैव वक्तुं शक्यते यत् भाष्यकाराणां दृष्टिभेदेन समयभेदेन च वेदमन्त्राणाम् अर्थवैचित्र्यमायाति, यत् भाषावैज्ञानिकदृष्ट्या अपि स्वीक्रियते।

**सन्दर्भग्रन्थसूची**


1. सायणाचार्यतैत्तिरीयभाष्यभूमिका ,
2. महर्षियाज्ञवल्क्य याज्ञवल्क्यस्मृतिः
3. पुरोहितः सन्निज्यार्थ सुदासा सह यन्नृषिः।
4. विपाट्छतुद्रयोः संभेदं शमित्येते उवाच ह। (बृहद्देवता, ४.१०६)
5. निरुक्तम् -९.२६
6. निघण्टुः – ३.१५
7. निघण्टुः – ३.१५
8. निघण्टुः – १.१०
9. `महान्तमिन्द्र पर्वतं मेघं यत् व्यवृणोर्व्यसृजोऽस्य'(निरूक्तम् – १०.१)
10. `अथ यद्विषतो भवति तद्विष्णुर्भवति । विष्णुर्विशतेर्वा, व्यश्नोतेर्वा ।(निरुक्तम् – १२.१८)
11. विष्णुसहस्रनाम,गीताप्रेस गोरखपुर। १९९९, पृ. ७, ६६
12. `अश्वे इव विमुक्ते इति वा विषण्णे इति वा'। (निरुक्तम् – ९.३९)
13. `पर्वतानामुपस्थादुपस्थाना दुशत्यौ कामयमाने अश्वे इव विमुक्ते इति वा विषण्णे इति वा हासमाने हासति स्पर्थायां हर्षमाणे विपाट्छतुदौ पयसा प्रजवेते'।(निरुक्तम् – ९.३९)
14. आङ्गलग्रन्थाः
15. Chowdhury, Dr. Satya Dev. *Dialogue Hymns of Rgveda*. Varanasi: Bharatiya Vidya Bhavan, 2002. Print.
16. वङ्गीयग्रन्थाः
17. ठाकुर, अमरेश्वर, सम्पा। *निरुक्त।* कोलकाला. कलिकाता: विश्वविद्यालय, 2004, मुद्रण।
18. मजुमदार, प्रदीपकुमार, सम्पा, अनुवादक। *ऋग्वेदेरसंवादसूक्तेरअनुवाद ओ आलोचना।* कोलकाता। संस्कृतपुस्तकभाण्डार, मुद्रण।
19. संस्कृतग्रन्थाः
20. उपाध्याय, आचार्यबलदेव। *वेदभाष्यभूमिकासंग्रहः (सायणाचार्यकृत)*। वाराणसी: चौखम्बासंस्कृत संस्थान, मुद्रन्।
21. तिवारी, शशि। *वैदिकव्याख्यापद्धतयः*। दिल्ली: प्रतिभाप्रकाशन, मुद्रन्।
22. मीमांसक, पण्डितयुधिष्टिर, सम्पा। *अथ वेदाङ्गप्रकाशः –निघण्टुः*। अजमेरः आर्य साहित्य मण्डल लिमिटेड, मुद्रन्।
23. सरस्वती, दयानन्दः। *ऋग्वेद-भाष्यम्*। अजमेर, राजस्थानः वैदिकपुस्तकालय, मुद्रन्।
24. हिन्दीग्रन्थाः
25. त्रिवेदी, पण्डित रामगोविन्द, सम्पा। ऋग्वेद-संहिताः सायणाचार्यकृतभाष्यसंवलिता। वाराणसीः चौखम्बाविद्याभवन, मुद्रण।
26. राय, रामकुमार, सम्पा, अनुवादक। *बृहद्देवता*। वाराणसीः चौखम्बा संस्कृत संस्थान्, मुद्रण